# Guhagita

# ગુહગીતા

## Document Information

Text title : Guha Gita

File name : guhagiitaa.itx

Category : gItA, giitaa, subrahmanya

Location : doc_giitaa

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi, PSA Easwaran

Source : Subrahmanyastutimanjari, Mahaperiaval Trust

Latest update : June 7, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# ગુહગીતા

અથ ગુહગીતા પ્રારમ્ભઃ ।
અથ પ્રથમોऽધ્યાયઃ
મનોવિકારઃ
વિપ્રા ઊચુઃ-
સૂતપુત્ર મહાપ્રાજ્ઞ કથકોऽસિ દયાકર ।
ગુહગીતાં ચ નો વક્તું ત્વમેવાર્હસિ ચાનઘ ॥ ૧.૧॥

સૂત ઉવાચ-
કુતુકી ગુહગીતાયાઃ શ્રવણે તત્પરો મુનિઃ ।
કર્મયોગી હિડિમ્ભં ચ પ્રાર્થયન્ પ્રત્યહં સ્થિતઃ ॥ ૧.૨॥

શ્રાન્તોऽસિ કિં વા શ્રોતું મે ચારિત્રં વચ્મિ સાદરમ્ ।
વદન્નેવં હિડિમ્ભશ્ચાપ્યાગતઃ પુનરેકદા ॥ ૧.૩॥

મુનિરુવાચ-
સત્કારં સ્વીકુરુષ્વાદ્ય ગુહગીતાં દયાનિધે ।
હિડિમ્ભ બ્રૂહિ મે વક્તા ત્વમેવ ખલુ ભક્તરાટ્ ॥ ૧.૪॥

હિડિમ્ભ ઉવાચ-
બહુધા સેવિતઃ સ્વામી મયા ભિક્ષુઃ ષડાનનઃ ।
પ્રસાદમકરોત્ દિવ્યકરુણાપાઙ્ગતો મયિ ॥ ૧.૫॥

તદાऽહં સભયં ભક્ત્યા સહિતઃ પ્રણમન્ ગુરો ।
કિં ત્વયા નિહતા ભિક્ષો પૂર્વજા મમ ચાન્વયે ॥ ૧.૬॥

કિમહં રક્ષિતશ્ચાસ્મિ ત્વયા તત્કારણં વદ ।
ન મન્યે ત્વાં વિના હ્યન્યં મત્સન્દેહનિવારકમ્ ॥ ૧.૭॥

શ્રીભિક્ષુરુવાચ-
પ્રશિષ્યોऽસિ હિડિમ્ભ ત્વં સાક્ષાત્ શિષ્યશ્ચ પાર્ષદઃ ।

હન્ત તે કથયિષ્યામિ તત્ત્વં શ‍ૃણુ સમાહિતઃ ॥ ૧.૮॥

અભયં સત્ત્વસંશુદ્ધિઃ જ્ઞાનયોગવ્યવસ્થિતિઃ ।
દાનં દમશ્ચ યજ્ઞશ્ચ સ્વાધ્યાયસ્તપ આર્જવમ્ ॥ ૧.૯॥

અહિંસા સત્યમક્રોધઃ ત્યાગશ્શાન્તિરપૈશુનમ્ ।
દયા ભૂતેષ્વલોલુપ્તિઃ માર્દવં હ્રીરચાપલમ્ ॥ ૧.૧૦॥

તેજઃ ક્ષમા ધૃતિઃ શૌચં અદ્રોહો નાતિમાનિતા ।
ભવન્તિ સમ્પદં દૈવીં અભિજાતે હિડિમ્ભક ॥ ૧.૧૧॥

દમ્ભો દર્પોઽભિમાનશ્ચ ક્રોધઃ પારુષ્યમેવ ચ ।
અજ્ઞાનં ચાભિજાતેષુ સમ્પદં રાક્ષસીં બત ॥ ૧.૧૨॥

તે પૂર્વજાઃ શૂરમુખ્યા અભિજાતાશ્ચ રાક્ષસીમ્ ।
પ્રવૃત્તિં ચ નિવૃત્તિં ચ ન જાનન્તિ હિ રાક્ષસાઃ ॥ ૧.૧૩॥

ન શૌચં ન સદાચારો ન સત્યં તેષુ વિદ્યતે ।
પ્રભૂતા હ્યુગ્રકર્માણઃ ક્ષયાય જગતોઽહિતાઃ ॥ ૧.૧૪॥

કામોપભોગપરમાઃ ક્રોધોપાત્તબલાધિકાઃ ।
અસત્યમપ્રતિષ્ઠં તે જગદાહુરનીશ્વરમ્ ॥ ૧.૧૫॥

ઈશ્વરોઽહમહં ભોગી કોઽન્યોસ્તિ સદૃશો મયા ।
યક્ષ્યે દાસ્યામિ મોદિષ્યે ઇત્યજ્ઞાનવિમોહિતાઃ ॥ ૧.૧૬॥

મયૈવ નિહતાઃ પૂર્વે લોકરક્ષેચ્છયા કિલ ।
મા શુચઃ સમ્પદં દૈવીં અભિજાતોઽસ્યનામયઃ ॥ ૧.૧૭॥

પુણ્યપુઞ્જપ્રભાવોઽસિ ગુરુણા કુમ્ભજન્મના ।
મયૈવ સઞ્જીવિતોઽસિ નિહતોઽપિ હિડિમ્ભક ॥ ૧.૧૮॥

આર્તોઽસિ જિજ્ઞાસુરસિ જ્ઞાની ચાસિ હિડિમ્ભક ।
મત્સેવાર્થ્યસિ કા ચિન્તા સુખી ભવ નિરન્તરમ્ ॥ ૧.૧૯॥

હિડિમ્ભ ઉવાચ-
તદા મે સદ્ગુરોર્ભિક્ષોઃ ઉક્તદિવ્યોપદેશતઃ ।
મત્પૂર્વિકમહાભોગભાગ્યવૈભવસંસૃતેઃ ॥ ૧.૨૦॥

આનન્દબાષ્પા ઉદ્રિક્તાઃ સાકં દુઃખાશ્રુભિર્બત ।
નિર્વિણ્ણોઽહં સ્વયં બુદ્ધો નિશ્ચેષ્ટોઽસ્મિ તતો ગુરોઃ ॥ ૧.૨૧॥

ભિક્ષુરુવાચ-
કુતસ્ત્વા કશ્મલમિદં વિષમે સમુપસ્થિતમ્ ।
ગતાસૂનગતાંસૂંશ્ચ નાનુશોચતિ તત્ત્વવિત્ ॥ ૧.૨૨॥

નત્વેવાહં જાતુ નાસં ન ત્વં નેમે ત્વદગ્રજાઃ ।
ન ચૈવ ન ભવિષ્યામઃ સર્વે વયમતઃ પરમ્ ॥ ૧.૨૩॥

દેહિનોઽસ્મિન્ યથા દેહે કૌમારં યૌવનં જરા ।
તથા દેહાન્તરપ્રાપ્તિર્ધીરસ્તત્ર ન મુહ્યતિ ॥ ૧.૨૪॥

અવિનાશિ તુ તદ્વિદ્ધિ યેન સર્વમિદં તતમ્ ।
વિનાશમવ્યયસ્યાસ્ય ન કશ્ચિત્ કર્તુમર્હતિ ॥ ૧.૨૫॥

ય એનં વેત્તિ હન્તારં યશ્ચૈનં મન્યતે હતમ્ ।
ઉભૌ તૌ ન વિજાનીતો નાયં હન્તિ ન હન્યતે ॥ ૧.૨૬॥

અચ્છેદ્યોઽયમદાહ્યોઽયં અક્લેદ્યોઽશોષ્ય એવ ચ ।
નિત્યસ્સર્વગતઃ સ્થાણુઃ અચલોઽયં સનાતનઃ ॥ ૧.૨૭॥

અવ્યક્તોઽયં અચિન્ત્યોઽયં અવિકાર્યોઽયમુચ્યતે ।
તસ્માદેવં વિદિત્વૈનં નાનુશોચિતુમર્હસિ ॥ ૧.૨૮॥

યદિદં દૃશ્યતે સર્વં જગત્ સ્થાવરજઙ્ગમમ્ ।
તત્ સુષુપ્તાવિવ સ્વપ્નઃ કલ્પાન્તે પ્રવિનશ્યતિ ॥ ૧.૨૯॥

ઋતમાત્મા પરં બ્રહ્મ સત્યમિત્યાદિકા બુધૈઃ ।
કલ્પિતા વ્યવહારાર્થં યસ્ય સઞ્જ્ઞા મહાત્મનઃ ॥ ૧.૩૦॥

યથા કટકશબ્દાર્થઃ પૃથગ્ભાવો ન કાઞ્ચનાત્ ।
ન હેમકટકાત્ તદ્વત્ જગત્ શબ્દાર્થતા પરે ॥ ૧.૩૧॥

તેનેયમિન્દ્રજાલ ક્રીડાગતિઃ પ્રવિતન્યતે ।
દ્રષ્ટુર્દૃશ્યસ્ય સત્તાન્તઃ બન્ધ ઇત્યભિધીયતે ॥ ૧.૩૨॥

દૃષ્ટ્વા દૃશ્યવશાત્ બદ્ધો દૃશ્યાભાવે વિમુચ્યતે ।
જગત્ત્વમહમિત્યાદિ સર્ગાત્મા દૃશ્યમુચ્યતે ॥ ૧.૩૩॥

મનસ્તેનેન્દ્રજલશ્રીઃ જગતી પ્રવિતન્યતે ।
યાવદેતત્ સમ્ભવતિ તાવન્મોક્ષો ન વિદ્યતે ॥ ૧.૩૪॥

બ્રહ્મણા તન્યતે વિશ્વં મનસૈવ સ્વયમ્ભુવા ।
મનોમયમતો વિશ્વં યન્નામ પરિદૃશ્યતે ॥ ૧.૩૫॥

ન બાહ્યે નાપિ હૃદયે સદ્રૂપં વિદ્યતે મનઃ ।
યદર્થં પ્રતિભાનં તત્ મન ઇત્યભિધીયતે ॥ ૧.૩૬॥

સઙ્કલ્પનં મનો વિદ્ધિ સઙ્કલ્પસ્તત્ર વિદ્યતે ।
યત્ર સઙ્કલ્પનં તત્ર મનોઽસ્તીત્યવગમ્યતામ્ ॥ ૧.૩૭॥

સઙ્કલ્પમનસી ભિન્ને ન કદાચન કેનચિત્ ।
સઙ્કલ્પજાતે ગલિતે સ્વરૂપમવશિષ્યતે ॥ ૧.૩૮॥

અહં ત્વં જગદિત્યાદૌ પ્રશાન્તે દૃશ્યસમ્ભ્રમે ।
સ્યાત્ તાદૃશી કેવલતા દૃશ્યે સત્તામુપાગતે ॥ ૧.૩૯॥

મહાપ્રલય સમ્પત્તૌ હ્યસત્તાં સમુપાગતે ।
અશેષદૃશ્યે સર્ગાદૌ શાન્તમેવાવશિષ્યતે ॥ ૧.૪૦॥

મનસા ભાવ્યમાનો હિ દેહતાં યાતિ દેહકઃ ।
મનોવિલાસઃ સંસાર ઇતિ મે નિશ્ચિતા મતિઃ ॥ ૧.૪૧॥

અન્તઃકરણસદ્ભાવસ્ત્વવિદ્યાયાશ્ચ સમ્ભવઃ ।
અનેકકોટિબ્રહ્માણ્ડં સર્વં મિથ્યેતિ નિશ્ચિનુ ॥ ૧.૪૨॥

જીવન્નેવ સદા મુક્તઃ કૃતાર્થો બ્રહ્મવિત્તમઃ ।
ઉપાધિનાશાદ્બ્રહ્મૈવ સ બ્રહ્માપ્નોતિ નિર્ભયમ્ ॥ ૧.૪૩॥

તદ્બ્રહ્માનન્દમદ્વન્દ્વં નિર્ગુણં સત્યચિદ્ઘનમ્ ।
વિદિત્વા સ્વાત્મનો રૂપં મા બિભેસ્ત્વં કદાચન ॥ ૧.૪૪॥

સર્વં ચ ખલ્વિદં બ્રહ્મ નિત્યં ચિદ્ઘનમક્ષતમ્ ।
કલ્પનાઽન્યા મનોનામ્ની વિદ્યતે નહિ કાચન ॥ ૧.૪૫॥

ન જાયતે ન મ્રિયતે કિઞ્ચિદત્ર જગત્ત્રયે ।
ન ચ ભાવવિકારાણાં સત્તા કચન વિદ્યતે ॥ ૧.૪૬॥

નાહં માંસં ન ચાસ્થીનિ દેહાદન્યઃ પરોઽસ્મ્યહમ્ ।
ઇતિ નિશ્ચિતવાનન્તઃ ક્ષીણાવિદ્યો વિમુચ્યતે ॥ ૧.૪૭॥

મા ભવાજ્ઞો ભવ જ્ઞસ્ત્વં જહિ સંસારભાવનામ્ ।
અનાત્મન્યાત્મભાવેન કિમજ્ઞ ઇવ રોદષિ ॥ ૧.૪૮॥

કસ્તવાયં જડો મૂકો દેહો માંસમયોઽશુચિઃ ।
યદર્થં સુખદુઃખાભ્યાં અવશઃ પરિભૂયસે ॥ ૧.૪૯॥

અઙ્ગાન્યઙ્ગૈરિવાક્રમ્ય જયેદાદૌ સ્વકં મનઃ ।
મનસો વિજયાન્નાન્યા ગતિરસ્તિ ભવાર્ણવે ॥ ૧.૫૦॥

પ્રક્ષીણચિત્તદર્પસ્ય નિગૃહીતેન્દ્રિયદ્વિષઃ ।
પદ્મિન્ય ઇવ હેમન્તે ક્ષીયન્તે ભોગવાસનાઃ ॥ ૧.૫૧॥

વિવેકં પરમાશ્રિત્ય બુદ્ધ્યા સત્યમવેક્ષ્ય ચ ।
ઇન્દ્રિયારીનલં છિત્વા તીર્ણો ભવ ભવાર્ણવાત્ ॥ ૧.૫૨॥

યદ્યત્કરોષિ સત્યેન સર્વં મિથ્યેતિ નિશ્ચિનુ ।
ત્વમેવ પરમાત્માસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૧.૫૩॥

ઇતિ કલિસન્તારક શ્રીગુહગીતાયાં બ્રહ્મવિદ્યાયાં
અદ્વૈતશાસ્ત્રે ભિક્ષુરૂપિગુહહિડિમ્ભસંવાદે
મનોવિકારો નામ પ્રથમોઽધ્યાયઃ ॥ ૧॥

---

અથ દ્વિતીયોઽધ્યાયઃ
સર્વત્ર સમભાવના
શ્રીભિક્ષુરુવાચ-
અન્તરાસ્થાં પરિત્યજ્ય ભાવશ્રીં ભાવનામયીમ્ ।
યોઽસિ સોઽસિ જગત્યસ્મિન્ લીલયા વિહરાનઘ ॥ ૨.૧॥

સર્વત્રાહં અકર્તેતિ દૃઢભાવનયાઽનયા ।
પરમામૃતનામ્ની સા સમતૈવાવશિષ્યતે ॥ ૨.૨॥

ખેદોલ્લાસવિલાસેષુ સ્વાત્મકર્તૃતયૈકયા ।
સ્વસઙ્કલ્પે ક્ષયં યાતે સમતૈવાવશિષ્યતે ॥ ૨.૩॥

સમતા સર્વભૂતેષુ યાસૌ સત્યપરા સ્થિતિઃ ।
તસ્યાં અવસ્થિતં ચિત્તં ન ભૂયો જન્મભાગ્ભવેત્ ॥ ૨.૪॥

અથવા સર્વકર્તૃત્વં અકર્તૃત્વં તથૈવ ચ ।
સર્વં ત્યક્ત્વા મનઃ પીત્વા યોઽસિ સોઽસિ સ્થિરો ભવ ॥ ૨.૫॥

શેષસ્થિરસમાધાનો યેન ત્યજસિ તત્ત્યજ ।
ચિન્મનઃ કલનાકારં પ્રકાશતિમિરાદિકમ્ ॥ ૨.૬॥

વાસનાં વાસિતારં ચ પ્રાણસ્પન્દનપૂર્વકમ્ ।
સમૂલમખિલં ત્યક્ત્વા વ્યોમસામ્યઃ પ્રશાન્તધીઃ ॥ ૨.૭॥

હૃદયાત્સમ્પરિત્યજ્ય વાસનાપઙ્ક્તયોઽખિલાઃ ।
યસ્તિષ્ઠતિ ગતવ્યગ્રઃ સ મુક્તઃ પરમેશ્વરઃ ॥ ૨.૮॥

દૃષ્ટં દ્રષ્ટવ્યમખિલં ભ્રાન્તં ભ્રાન્ત્યા દિશો દશ ।
યુક્ત્યા વૈ ચરતોઽજ્ઞસ્ય સંસારો ગોષ્પદાકૃતિઃ ॥ ૨.૯॥

સબાહ્યાભ્યન્તરે દેહે હ્યધ ઊર્ધ્વં ચ દિક્ષુ ચ ।
ઇત આત્મા તતોઽપ્યાત્મા નાસ્ત્યનાત્મમયં જગત્ ॥ ૨.૧૦॥

ન તદસ્તિ ન યત્રાહં ન તદસ્તિ ન તન્મયમ્ ।
કિમન્યત્ અભિવાઞ્છામિ સર્વં સચ્ચિન્મયં તતમ્ ॥ ૨.૧૧॥

સમસ્તં ખલ્વિદં બ્રહ્મ પરમાત્મેદમાતતમ્ ।
અહમન્યત્ ઇદં ચાન્યત્ ઇતિ ભ્રાન્તિ ત્યજાનઘ ॥ ૨.૧૨॥

તતો બ્રહ્મઘને નિત્યે સમ્ભવન્તિ ન કલ્પિતાઃ ।
ન શોકોઽસ્તિ ન મોહોઽસ્તિ ન જરાઽસ્તિ ન જન્મ ચ ॥ ૨.૧૩॥

યદસ્તીહ તદેવાસ્તિ વિજ્વરો ભવ સર્વદા ।
યથા પ્રાપ્તાનુભવતઃ સર્વત્રાનભિવાઞ્છનાત્ ।
ત્યાગાદાન પરિત્યાગી વિજ્વરો ભવ સર્વદા ॥ ૨.૧૪॥

ન વર્ણાશ્રમાચારધર્માઃ કુતસ્તે
ન પુણ્યં ન પાપં ન ધર્મોઽપ્યધર્મઃ ।
ન પૂજ્યોઽપ્યપૂજ્યઃ સદાઽઽનન્દભાવં
પરં બ્રહ્મ સાક્ષાત્ ત્વમેવાસિ તાત ॥

હિડિમ્ભ ઉવાચ-
એવમુક્ત્વા વિસૃષ્ટોઽહં બ્રહ્મસાક્ષાત્કૃતિં દદૌ ।
તદાદિ બ્રહ્મભાવેન સ્થિતોઽહં ગતકલ્મષઃ ॥ ૨.૧૬॥

બ્રહ્માકારાકારિતાન્તર્વૃત્તિઃ કલ્પિતવાનહમ્ ।
સર્વં સુબ્રહ્મણ્યમયં જગદ્ભાતિ ન સંશયઃ ॥ ૨.૧૭॥

વાચામગોચરં દિવ્યં મનોઽતીતં મહાદ્યુતિમ્ ।
તદ્બ્રહ્માનુભવં પૂર્ણાનન્દં વક્તું ન શક્યતે ॥ ૨.૧૮॥

તૂષ્ણીં સ્થિત્વા ભિક્ષુણા સમ્બોધિતોઽહં પ્રણમ્ય તમ્ ।
યત્ત્વયોક્તં વચસ્તેન મોહોઽયં વિગતો મમ ॥ ૨.૧૯॥

તવૈવાનુગ્રહેણાહં સચ્ચિદાનન્દમાત્રકઃ ।
કિં વા વક્તું ન શક્નોમિ ભગવન્ તવ સન્નિધૌ ॥ ૨.૨૦॥

એવં ગદ્ગદયા વાચાઽપ્યપૃચ્છં ભિક્ષુમવ્યયમ્ ।
કૃતાઞ્જલિપુટો ભૂત્વા નમસ્કૃત્ય પુનઃપુનઃ ॥ ૨.૨૧॥

સ્થાને ભિક્ષો તવોક્ત્યાઽહં ધ્યાત્વા ત્વામેવ સન્તતમ્ ।
જીવન્મુક્તોઽસ્મિ તાદાત્મ્યનિશ્ચયાદેવ ષણ્મુખ ॥ ૨.૨૨॥

વર્ણાશ્રમાચારધર્માઃ કિમર્થં વેદચોદિતાઃ ।
તૈર્બદ્ધાઃ કીદૃશા લોકે મુક્તાઃ કીદૃગ્વિધા અપિ ॥ ૨.૨૩॥

શ્રીભિક્ષુરુવાચ-
હન્ત તે કથયામ્યદ્ય તત્ત્વં શ ૃણુ સનાતનમ્ ।
અવિદ્યોપાધિનાઽશાન્તપ્રાણિનો જગતિ સ્થિતાઃ ॥ ૨.૨૪॥

વર્ણાશ્રમાદિધર્માશ્ચ સુકૃતં દુષ્કૃતં તથા ।
સાપ્યવિદ્યાઽનેકજન્મવાસનાપિહિતા મતા ॥ ૨.૨૫॥

નાદિરન્તોઽસ્તિ તસ્યાસ્તુ બ્રહ્મજ્ઞાનેન કેવલમ્ ।
બહૂનાં જન્મનામન્તે જ્ઞાનવાન્માં પ્રપદ્યતે ॥ ૨.૨૬॥

સર્વં બ્રહ્મૈવેતિ મતિઃ સ મહાત્મા સુદુર્લભઃ ।
પુરાઽપૃચ્છદગસ્ત્યોઽપિ પ્રણમ્ય પિતરં મમ ॥ ૨.૨૭॥

વર્ણાશ્રમાદિધર્માસ્તુ કથમ્ભૂતા વિભો ઇતિ ।
તદહં સઙ્ગ્રહેણૈવ વચ્મિ શ ૃણુ સનાતનમ્ ॥ ૨.૨૮॥

સહસ્રશીર્ષે ભગવાન્ સ્થિતો નારાયણાભિધઃ ।
ક્ષીરાબ્ધૌ ચિન્તયન્ શમ્ભું શઙ્કરં શિવમવ્યયમ્ ॥ ૨.૨૯॥

કદાચિત્ પઙ્કજં દિવ્યં તરુણાદિત્યસન્નિભમ્ ।
તસ્ય સુપ્તસ્ય દેવસ્ય નાભ્યાં જાતં મહત્તરમ્ ॥ ૨.૩૦॥

હિરણ્યગર્ભો ભગવાન્ બ્રહ્મા વિશ્વજગત્પતિઃ ।

આસ્થાય પરમાં મૂર્તિં તસ્મિન્ પદ્મે સમુદ્ભભૌ ॥ ૨.૩૧॥

શિવાજ્ઞયા તસ્ય પૂર્વવાસનાસહિતાન્મુખાત્ ।
બ્રહ્મણા બ્રાહ્મણસ્ત્રીભિઃ સહજાતા હિડિમ્ભક ॥ ૨.૩૨॥

તસ્ય હસ્તાત્ સહ સ્ત્રીભિઃ જજ્ઞિરે શઙ્કરાજ્ઞયા ।
સ્વસ્ત્રીષુ સ્વસ્વધર્મેણ માર્ગેણોત્થઃ સ્વભુર્ભવેત્ ॥ ૨.૩૪॥

અપરાસૂત્તમાજ્જાતઃ ત્વનુલોમઃ પ્રકીર્તિતઃ ।
ઉત્તમાસ્વપરાજ્જાતઃ પ્રતિલોમ ઇતિ સ્મૃતઃ ॥ ૨.૩૫॥

વર્ણસ્ત્રીષુ અનુલોમેન જાતસ્સ્યાદાન્તરાલિકઃ ।
વર્ણાસુ પ્રતિલોમેન જાતો વ્રાત્ય ઇતિ સ્મૃતઃ ॥ ૨.૩૬॥

બ્રાહ્મણ્યાં સધવાયાં યો બ્રાહ્મણેનૈવ મોહતઃ ।
જાતશ્ચૌર્યેણ કુણ્ડોઽસૌ વિધવાયાં તુ ગોલકઃ ॥ ૨.૩૭॥

એવમેવાનુલોમાશ્ચ પ્રતિલોમાશ્ચ જાતયઃ ।
ઉચ્ચાવચપ્રપઞ્ચેઽસ્મિન્ બહ્વ્યો જાતા હિ કામતઃ ॥ ૨.૩૮॥

વર્ણાનામાશ્રમાઃ પ્રોક્તા મુનિભિશ્ચ સનાતનૈઃ ।
તેષાં વર્ણાશ્રમસ્થાનાં વેદકિઙ્કરતા સદા ॥ ૨.૩૯॥

ચક્ષુરાદિપ્રિયાણાં ચ ભેદો લોકિપકારકઃ ।
તદ્વદ્વર્ણાશ્રમાદીનાં ભેદો લોકિપકારકઃ ॥ ૨.૪૦॥

ષણ્ણાં રસાનાં ભેદોઽસ્તિ યથા જિહ્વોપકારકઃ ।
તથા વર્ણાશ્રમાદીનાં ભેદો લોકિપકારકઃ ॥ ૨.૪૧॥

યથા ભાક્ષ્યવિશેષાણાં ભેદો ભોક્તુઃ પ્રયોજકઃ ।
તથા વર્ણાશ્રમાદીનાં ભેદો લોકપ્રયોજકઃ ॥ ૨.૪૨॥

યથા તરુલતાદીનાં ભેદઃ ફલસમૃદ્ધિદઃ ।
તથા વર્ણાશ્રમાદીનાં ભેદઃ ફલસમૃદ્ધિદઃ ॥ ૨.૪૩॥

યથા બહૂનાં લોહાનાં ભેદઃ કર્મસમૃદ્ધિદઃ ।
તથા વર્ણાશ્રમાદીનાં ભેદઃ કર્મસમૃદ્ધિદઃ ॥ ૨.૪૪॥

યથા રત્નાદિપાષાણભેદો ગૌરવદાયકઃ ।
તથા વર્ણાશ્રમાદીનાં ભેદો ગૌરવદાયકઃ ॥ ૨.૪૫॥

યથા પાકપ્રભેદો હિ દેહસ્યારોગ્યદો ભવેત્ ।
તથા વર્ણાશ્રમાદીનાં ભેદો લોકસ્ય સૌખ્યદઃ ॥ ૨.૪૬॥

યથા મૃગાણાં ભેદો હિ વનસ્યોલ્લાસકો ભવેત્ ।
તથા વર્ણાશ્રમાદીનાં ભેદો લોકસ્ય રઞ્જકઃ ॥ ૨.૪૭॥

યથાઽલઙ્કારભેદો હિ લોકવ્યાવૃત્તિસૂચકઃ ।
તથા વર્ણાશ્રમાદીનાં ભેદો વ્યાવૃત્તિસૂચકઃ ॥ ૨.૪૮॥

યથાઽનેકાયુધાનાં ચ ભેદો યુદ્ધજયપ્રદઃ ।
તથા વર્ણાશ્રમાદીનાં ભેદો જ્ઞાનજયપ્રદઃ ॥ ૨.૪૯॥

યથા બહૂનાં પુષ્પાણાં ભેદો ભોગસમૃદ્ધિદઃ ।
તથા વર્ણાશ્રમાદીનાં ભેદો ધર્મસમૃદ્ધિદઃ ॥ ૨.૫૦॥

યથા શુક્લાદિવર્ણાનાં ભેદઃ ચક્ષુઃસુખઙ્કરઃ ।
તથા વર્ણાશ્રમાદીનાં ભેદો જનસુખઙ્કરઃ ॥ ૨.૫૧॥

તતો વર્ણાશ્રમાચારે ન વૈરં પરિકલ્પયેત્ ।
યદા વર્ણાશ્રમાદીનાં શાત્રવં સ્યાત્ પરસ્પરમ્ ॥ ૨.૫૨॥

તદા લોકસ્ય સંહારઃ સ્વાઙ્ગૈર્દેહસ્ય નાશવત્ ।
વર્ણાનામાશ્રમાણાં ચ સઙ્કરો ધર્મનાશકઃ ॥ ૨.૫૩॥

મલ્લોકપાશદોઽસિ ત્વં તતસ્ત્વાં શિક્ષયામ્યહમ્ ।
યદા વર્ણાશ્રમાદીનાં યત્ર લોપઃ પ્રજાયતે ॥ ૨.૫૪॥

તત્ર સ્થિત્વા પ્રસન્નસ્ત્વં ધાર્મિકાવનદો ભવ ।
હિડિમ્ભ સ્ત્રીષુ દુષ્ટાસુ જાયતે વર્ણસઙ્કરઃ ॥ ૨.૫૫॥

સ કાલઃ કલિરિત્યુક્તો લોકધર્મવિનાશકઃ ।
અટ્ટશૂલા જનપદાઃ શિવશૂલાઃ ચતુષ્પદાઃ ॥ ૨.૫૬॥

પ્રમદાઃ કેશશૂલિન્યો જનકાઃ પાકશૂલિનઃ ।
સ્વદેહશૂલિનઃ સર્વે પ્રભવન્તિ કલૌ યુગે ॥ ૨.૫૭॥

તસ્માત્ વર્ણાશ્રમાદીનાં રક્ષકો ભવ સન્તતમ્ ।
વ્યાવહારિકલોકેઽસ્મિન્ ઇદં કાર્યં ત્વયા શ‍ૃણુ ॥ ૨.૫૮॥

સર્વેષાં કર્મણા જાતિઃ નાન્યથા કલ્પકોટિભિઃ ।
પશ્વાદીનાં યથા જાતિઃ જન્મનૈવ ચ નાન્યથા ॥ ૨.૫૯॥

સાઽપિ સ્થૂલસ્ય દેહસ્ય ભૌતિકસ્ય ન ચાત્મનઃ ।
તથાપિ દેહેઽહમ્માનાત્ આત્મા વિપ્રાદિસઞ્જ્ઞિતઃ ॥ ૨.૬૦॥

સ્વસ્વરૂપાપરિજ્ઞાનાત્ દેહેઽહમ્માન આત્મનઃ ।
અપરિજ્ઞાનમપ્યસ્ય ચાવિદ્યાવાસનાબલાત્ ॥ ૨.૬૧॥

યસ્યાપરોક્ષવિજ્ઞાનં અસ્તિ શ્રીગુર્વનુગ્રહાત્ ।
તસ્ય નાસ્તિ નિયોજ્યત્વં ઇતિ મે નિશ્ચિતા મતિઃ ॥ ૨.૬૨॥

અસ્તિ ચેત્ બ્રહ્મવિજ્ઞાનં સ્ત્રિયો વા પુરુષસ્ય વા ।
વર્ણાશ્રમસમાચારઃ તસ્ય નાસ્ત્યેવ સર્વદા ॥ ૨.૬૩॥

અવિજ્ઞાયાત્મવિજ્ઞાનં યે સ્વવર્ણાશ્રમાદિકાન્ ।
ત્યજન્તિ મૂઢાત્માનસ્તે પતન્ત્યેવ ન સંશયઃ ॥ ૨.૬૪॥

હિડિમ્ભ નિસ્સંશયભાવતસ્ત્વં
દૃઢં ભજન્માં સુવિહારકો ભવ ।
મદઙ્ઘ્રિભક્તસ્ય સદાઽસ્તુ નિર્ભયં
પુનશ્ચ કિં પૃચ્છસિ માં મહામતે ॥ ૨.૬૫॥

ઇતિ કલિસન્તારક શ્રીગુહગીતાયાં બ્રહ્મવિદ્યાયાં
અદ્વૈતશાસ્ત્રે ભિક્ષુરૂપિગુહહિડિમ્ભસંવાદે
સર્વત્ર સમભાવનાનામ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

---

અથ તૃતીયોઽધ્યાયઃ
અજ્ઞાનમૂલમ્
હિડિમ્ભ ઉવાચ-
સ્વામિન્ રહસ્યં મે બ્રૂહિ દેવાનાં દેહિનાં વિભો ।
યદ્ભાવનાબલેનૈવ પ્રાણી મોક્ષમવાપ્નુયાત્ ॥ ૩.૧॥

શ્રીભિક્ષુરુવાચ-
રહસ્યં તે પ્રવક્ષ્યામિ સમાસેન સવિસ્તરાત્ ।
શ્રદ્ધયા શ ૃણુ શૈરેય સર્વસિદ્ધિકરં પરમ્ ॥ ૩.૨॥

સર્વેષાં કારણં સાક્ષાત્ પરતત્ત્વમવસ્થિતમ્ ।
ત્વગસૃઙ્માંસમેદોઽસ્થિમજ્જાષટ્કૌશિકે સ્વયમ્ ॥ ૩.૩॥

પાઞ્ચભૌતિકદેહેઽસ્મિન્ શિવશ્શિવતરોઽસ્મ્યહમ્ ।
શિવઃ પઞ્ચમુખોઽહન્તુ ષણ્મુખસ્તત ઉચ્યતે ॥ ૩.૪॥

આવયોરૈક્યભાવો હિ મુક્તિહેતુર્હિ પ્રાણિનામ્ ।
શિવપઞ્ચમુખાન્યેવ બ્રહ્માણ્ડે પઞ્ચદેવતાઃ ॥ ૩.૫॥

કાર્યં બ્રહ્મા મહીભાગે કાયં વિષ્ણુર્જલાશયે ।
કાર્યં રુદ્રોઽગ્નિભાગે ચ વાય્વંશે ચેશ્વરઃ પરઃ ॥ ૩.૬॥

આકાશાંશે શરીરસ્ય સ્થિતસ્સાક્ષાત્ સદાશિવઃ ।
શરીરસ્ય બહિર્ભાગે વિરાડાત્મા સ્થિતસ્સદા ॥ ૩.૭॥

અન્તર્ભાગે સ્વરાડાત્મા સમ્રાડ્દેહસ્ય મધ્યમે ।
જ્ઞાનેન્દ્રિયેષુ મનસિ શ્રોત્રાદિષુ ચ પઞ્ચસુ ॥ ૩.૮॥

મમ ષડ્વદનાન્યેવ ગ્લૌદિગ્વાય્વર્કવાર્વરાઃ ।
ભૂમિશ્ચ કાયભૂતાઃ સ્યુઃ પઞ્ચહસ્તો ગણેશ્વરઃ ॥ ૩.૯॥

કર્મેન્દ્રિયસ્વરૂપશ્ચ પાદપાણ્યાદિષુ ક્રમાત્ ।
ત્રિવિક્રમેન્દ્ર વહ્વ્યાખ્યાઃ કાયભૂતાઃ પ્રજાપતિઃ ॥ ૩.૧૦॥

મિત્રશ્ચાપિ તથા પ્રાણે સૂત્રાત્મા સુસ્થિતસ્સદા ।
ચતુર્મુખોઽન્તઃ કરણે તદવસ્થાસુ ચ ક્રમાત્ ॥ ૩.૧૧॥

ચન્દ્રમા મનસિ પ્રોક્તો બુદ્ધૌ તુ સ બૃહસ્પતિઃ ।
અહઙ્કારે ચ કાલાગ્નિઃ રુદ્રશ્ચિત્તે શિવઃ સ્થિતઃ ॥ ૩.૧૨॥

ભૂતપ્રેતપિશાચાદ્યાઃ દેહસ્યાસ્થિષુ સંસ્થિતાઃ ।
મજ્જાખ્યે પિતૃગન્ધર્વાઃ રોમસુ ક્ષુદ્રદેવતાઃ ॥ ૩.૧૩॥

સર્વાશ્ચ રાક્ષસાશ્ચૈવ સ્થિતાઃ સ્નાયુષુ સર્વશઃ ।
વર્તન્તે દેવતાસ્સર્વાઃ દેહેઽસ્મિન્નેવ સંસ્થિતાઃ ॥ ૩.૧૪॥

ત્રિમૂર્તિનાં તુ યો બ્રહ્મા તસ્ય ઘોરાભિધા તનુઃ ।
દક્ષિણાક્ષિણિ જન્તૂનાં શાન્તાખ્યા ચ તનુસ્તથા ॥ ૩.૧૫॥

વર્તન્તે વામનેત્રે ચાપ્યન્તર્ભાગે તયોઃ પુનઃ ।
બહિર્ભાગે સૂર્યચન્દ્રૌ વર્તેતે કન્ધરે તથા ॥ ૩.૧૬॥

ત્રિમૂર્તીનાં તુ યો વિષ્ણુઃ શાન્તો ઘોરોઽન્તતો બહિઃ ।
ત્રિમૂર્તીનાં તુ યો રુદ્રઃ શાન્તો ઘોરોઽન્તતો બહિઃ ॥ ૩.૧૭॥

ચિચ્છક્તિઃ પરમા દેહમધ્યે કુણ્ડલિની સ્થિતા ।
માયાશક્તિર્લલાટાગ્રે તન્મધ્યે નાદરૂપિણી ॥ ૩.૧૮॥

અપરાંશે બિન્દુમયી તસ્ય શક્તિઃ સ્થિતા સ્વયમ્ ।
જીવાત્મા બિન્દુમધ્યે તુ સૂક્ષ્મરૂપઃ પ્રકાશતે ॥ ૩.૧૯॥

હૃદયે સ્થૂલરૂપેણ તયોર્મધ્યે તુ મધ્યમઃ ।
હૃન્મધ્યે તુ મહાલક્ષ્મીઃ જિહ્વાયાં તુ સરસ્વતી ॥ ૩.૨૦॥

રુદ્રાણી સહ રુદ્રેણ હૃદયે વર્તતે સદા ।
ઈશ્વરસ્સર્વત્ર દેહે સર્વસાક્ષી સદાશિવઃ ॥ ૩.૨૧॥

જ્ઞા સમ્યક્ નવતાં દેહે સકલા દેવતા અમૂઃ ।
પ્રત્યગાત્મતયા ભાન્તિ દેવતારૂપતોઽપિ ચ ॥ ૩.૨૨॥

વેદમાર્ગૈકનિષ્ઠાનાં વિશુદ્ધાનાં તુ વિગ્રહે ।
દેવતારૂપતો ભાન્તિ ન ભાતિ પ્રત્યગાત્મના ॥ ૩.૨૩॥

તાન્ત્રિકાણાં શરીરે તુ વર્તન્તે ન પ્રકાશકાઃ ।
શુદ્ધભાવાત્ યથાજાતપ્રાણિનાં સર્વદેવતાઃ ॥ ૩.૨૪॥

તિરોભૂતતયા નિત્યં વર્તન્તે ન સ્વરૂપતઃ ।
અતશ્ચ ભોગમોક્ષાર્થી શરીરં દેવતામયમ્ ॥ ૩.૨૫॥

સ્વકીયં પરકીયં ચ પૂજયેત્ સુવિશેષતઃ ।
નાવમાનં સદા કુર્યાત્ મોહતો વાપિ બુદ્ધિમાન્ ॥ ૩.૨૬॥

યદિ કુર્યાત્ પ્રમાદેન પતત્યેવ ભવાર્ણવે ।
દુર્વૃત્તમપિ મૂર્ખં ચ પૂજયેત્ દેવતાત્મના ॥ ૩.૨૭॥

દેવતારૂપતઃ પશ્યન્ મુચ્યતે જન્મબન્ધનાત્ ।
મોહેનાપિ સદા નૈવ કુર્યાદપ્રિયભાષણમ્ ॥ ૩.૨૮॥

યદિ કુર્યાત્ પ્રમાદેન હન્તિ તં પરદેવતા ।
દેહે તુ ન ક્ષતં કુર્યાત્ અસ્ત્રશસ્ત્રનખાદિભિઃ ॥ ૩.૨૯॥

તથા ન લોહિતં કુર્યાત્ યદિ કુર્યાત્ પતત્યધઃ ।
એષા સનાતની વિદ્યા ભોગમોક્ષપ્રદાયિની ॥ ૩.૩૦॥

મયૈવ કથિતા નિત્યા સર્વલોકોપકારિણી ।

કથિતાઽભૂતે હિડિમ્ભ સર્વં બ્રહ્મમયં જગત્ ॥ ૩.૩૧॥

બ્રહ્માણ્ડેઽપિ ચ પિણ્ડાણ્ડે સર્વત્ર બ્રહ્મભાવતઃ ।
તત્ત્વમેવાસ્યહં ચાસિ દેવદેવ સુખી ભવ ॥ ૩.૩૨॥

ઇતિ કલિસન્તારક શ્રીગુહગીતાયાં બ્રહ્મવિદ્યાયાં
અદ્વૈતશાસ્ત્રે ભિક્ષુરૂપિગુહહિડિમ્ભસંવાદે
અજ્ઞાનમૂલં નામ તૃતીયોઽધ્યાયઃ ॥ ૩॥

---

અથ ચતુર્થોઽધ્યાયઃ
જ્ઞાનોત્પત્તિઃ
હિડિમ્ભ ઉવાચ-
સઙ્કોચો દેહયાત્રાયાં પ્રાણિનાં અસ્તિ ષણ્મુખ ।
તેષુ જ્ઞાનાર્થિનાં બુદ્ધિરુપક્ષીણા ભવેત્કિલ ॥ ૪.૧॥

તદ્ધેતોઃ જ્ઞાનસમ્પત્તિઃ દેહયાત્રા ચ દુર્લભા ।
તસ્યાસ્તસ્યાશ્ચ સૌલભ્યં કથં ભવતિ સદ્ગુરો ॥ ૪.૨॥

શ્રીભિક્ષુરુવાચ-
હન્ત તાત પ્રવક્ષ્યામિ જ્ઞાનોત્પત્તેસ્તુ કારણમ્ ।
વિના યેન શિવજ્ઞાનં ન જાયેત કથઞ્ચન ॥ ૪.૩॥

મુમુક્ષુરતિસન્તુષ્ટઃ સિદ્ધ્યત્યેવ ગતિર્મમ ।
ઇતિ નિશ્ચયબુદ્ધિસ્તુ પ્રતિબન્ધનિવૃત્તયે ॥ ૪.૪॥

દેવતાસ્સકલા નિત્યં પ્રાર્થયેન્મતિમુત્તમઃ ।
અધિકારી ભવેત્તત્ર જન્મના કર્મણા દ્વિજઃ ॥ ૪.૫॥

શન્નો મિત્રશ્શં વરુણઃ શન્નો ભવતુ ચાર્યમા ।
શન્ન ઇન્દ્રો બૃહસ્પતિઃ શન્નો વિષ્ણુરુરુક્રમઃ ॥ ૪.૬॥

નમોઽસ્તુ બ્રહ્મણે વાયો નમોઽસ્તુ તવ શોભનમ્ ।
ત્વમેવ સાક્ષાદ્ બ્રહ્માસિ ત્વાં વદિષ્યામિ શઙ્કરમ્ ॥ ૪.૭॥

ઋતં ચ સત્યં ચાહં ત્વાં વદિષ્યામિ સમાહિતઃ ।
તન્મામવતુ કલ્યાણં તદ્વક્તારં ચ શોભનમ્ ॥ ૪.૮॥

માં ભૂયોઽવતુ વક્તારં અપિ ચાવતુ શોભનમ્ ।

શાન્તિઃ શાન્તિઃ પુનઃ શાન્તિઃ દોષત્રયનિવૃત્તયે ॥ ૪.૯॥

કૃત્વૈવં પ્રાર્થનાં આત્મજ્ઞાનાર્થં મતિમાન્ સદા ।
તસ્ય વિજ્ઞાનસમ્પત્તિઃ ક્રમતો જાયતે ધ્રુવમ્ ॥ ૪.૧૦॥

જપેન્નિત્યં ગુરોર્લબ્ધ્વા મન્ત્રં યશ્છન્દસામિતિ ।
મે ગોપાયેતિ પર્યન્તમ્ જ્ઞાનોત્પત્તેશ્ચ કારણમ્ ॥ ૪.૧૧॥

શતાક્ષરાં ચ ગાયત્રીં જપેન્નિત્યં દિને દિને ।
તન્મન્ત્રપૂતોદકેન સ્નાનપાનાદિનાઽપિ ચ ॥ ૪.૧૨॥

જ્ઞાનોત્પત્તિર્ભવત્યેવ શિવભક્ત્યા ચ સન્તતમ્ ।
ઉપાયમપરં ચાપિ બ્રવીમિ શ઼ૃણુ સાદરમ્ ॥ ૪.૧૩॥

ગુરોર્ભક્તિર્દૃઢા યસ્ય સ્વતો જ્ઞાનં પ્રજાયતે ।
બહૂનાં જન્મનામન્તે ગુરુભક્તિઃ પ્રજાયતે ॥ ૪.૧૪॥

ગુરુભક્તિયુતે જન્તૌ જ્ઞાનોત્પત્તિર્ન સંશયઃ ।
યથાકથઞ્ચિત્ સ ભવેત્ બ્રાહ્મણો જાયતે ભુવિ ॥ ૪.૧૫॥

બ્રાહ્મણો ગુરુભક્તસ્તુ શ્રુતિજ્ઞાનાત્ પ્રમુચ્યતે ।
શ્રુતિપ્રામાણ્યબુદ્ધિર્હિ મોક્ષસ્ય ગતિરુચ્યતે ॥ ૪.૧૬॥

પ્રારબ્ધં પુષ્યતિ વપુઃ ઇતિ નિશ્ચિત્ય ચેતસા ।
ધૈર્યમાલમ્બ્ય યત્નેન તૂષ્ણીં સ્થિતિરપિ સ્વયમ્ ॥ ૪.૧૭॥

વૈદેકાનાં ભવેદ્ જ્ઞાનજનને કારણં સદા ।
સઙ્કોચો દેહયાત્રાયાં તદ્દૃશાનાં ભવેત્ખલુ ॥ ૪.૧૮॥

અતઃ સઙ્કોચહાનાય ચાવહન્તીતિ મન્ત્રતઃ ।
આજ્યેનાન્નેન ચોભાભ્યાં જુહુયાચ્ચ દિને દિને ॥ ૪.૧૯॥

તદશક્તઃ સ્મરેન્નિત્યં મન્ત્રં વા શ્રદ્ધયા સહ ।
બ્રહ્મચારી ગૃહસ્થો વા વાનપ્રસ્થશ્ચ ભિક્ષુકઃ ॥ ૪.૨૦॥

નિત્યં આચાર્યશુશ્રૂષાં પ્રકુર્યાત્ ભક્તિપૂર્વકમ્ ।
પ્રાણિનાં તાદૃશાનાં તુ લોકયાત્રા ભવેત્સ્વયમ્ ॥ ૪.૨૧॥

અનન્યાશ્ચિન્તયન્તો માં યે જનાઃ પર્યુપાસતે ।
તેષાં નિત્યાભિયુક્તાનાં યોગક્ષેમં વહામ્યહમ્ ॥ ૪.૨૨॥

અહમેવ પરં સાક્ષાત્ અહમેવ સદાશિવઃ ।
અહમેવ જગત્સાક્ષી ચાહમેવ જગદ્ગુરુઃ ॥ ૪.૨૩॥

નિત્યં લિઙ્ગે મહાદેવં પૂજયેત્ ભક્તિમાન્નરઃ ।
વેદાન્તશ્રવણં કુર્યાત્ મનનં ચ સમાહિતઃ ॥ ૪.૨૪॥

રુદ્રાધ્યાયી ભવેન્નિત્યં રુદ્રાક્ષાભરણો ભવેત્ ।
ભસ્મત્રિપુણ્ડ્રધારી ચ જ્ઞાનવાન્માં પ્રપદ્યતે ॥ ૪.૨૫॥

શમ્ભોર્મમૈક્યભાવો હિ માયાઽવિદ્યાવિનાશકઃ ।
ઉક્તસાધનસમ્પન્નઃ જ્ઞાનાદ્ ભસ્માધિગચ્છતિ ॥ ૪.૨૬॥

શિવસ્વરૂપં પરમં ભાસનાત્ ભસ્મસઞ્જ્ઞિતમ્ ।
તદેવ સ્વીયમાયોત્થપ્રપઞ્ચે જલસૂર્યવત્ ॥ ૪.૨૭॥

અનુપ્રવિષ્ટં તદ્રૂપં ભસ્મલેશમુદાહૃતમ્ ।
તેન લેશેન દેવેશઃ પ્રતિબિમ્બેન ભસ્મના ॥ ૪.૨૮॥

સ્વતન્ત્રો બિમ્બભૂતસ્તુ સદૈવોદ્ધૂલિતઃ શિવઃ ।
સદૈવ પૂજનીયસ્તુ બ્રહ્મવિષ્ણ્વાદિભિઃ સુરૈઃ ॥ ૪.૨૯॥

સોઽહં ચાહં સ એવાસ્મિન્ વિષયે માસ્તુ સંશયઃ ।
આવયોરન્તરં નાસ્તિ તાત શબ્દાર્થયોરિવ ॥ ૪.૩૦॥

તત્પ્રસાદેન સર્વેષાં દેવત્વં ન સ્વભાવતઃ ।
સ્વભાવાદેવ દેવત્વં દેવદેવસ્ય મેઽપિ ચ ॥ ૪.૩૧॥

તં વિદિત્વા વિમુચ્યન્તે શાન્તા દાન્તા મુનીશ્વરાઃ ।
ગૃહસ્થાશ્ચ તથૈવાન્યે સત્યધર્મપરાયણાઃ ॥ ૪.૩૨॥

ભસ્મસઞ્છન્નસર્વાઙ્ગાઃ ત્રિપુણ્ડ્રાઙ્કિતમસ્તકાઃ ।
રુદ્રાક્ષમાલાભરણાઃ શ્રીષડક્ષરજાપકાઃ ॥ ૪.૩૩॥

નિત્યં દેવાર્ચનપરાઃ સત્ક્રિયાદગ્ધકિલ્બિષાઃ ।
એવં જ્ઞાનાર્થિનાં સમ્યક્ સાધનાનિ બહૂનિ ચ ॥ ૪.૩૪॥

સન્તિ તેષાં મુખ્યતમાનીદાનીં કથિતાનિ વૈ ।
જ્ઞાનં વેદાન્તવિજ્ઞાનં બ્રહ્માત્મૈકત્વગોચરમ્ ॥ ૪.૩૫॥

સમ્પાદનીયં તજ્જ્ઞાનં જ્ઞાનાન્મુચ્યેત બન્ધનાત્ ।
મદુક્તાર્તેષુ વિશ્વાસં હિડિમ્ભ કુરુ સન્તતમ્ ॥ ૪.૩૬॥

સર્વસૌલભ્યમેવાહં ઉપાયં વચ્મિ સાદરમ્ ।
મન્મના ભવ મદ્ભક્તો મદ્યાજી માં નમસ્કુરુ ॥ ૪.૩૭॥

અહં ત્વા સર્વકષ્ટેભ્યો મોક્ષયિષ્યામિ મા શુચઃ ।
એવમેવ વચસ્સાક્ષાત્ સદ્ગુરોઃ કરુણામૃતમ્ ॥ ૪.૩૮॥

દેવે રુષ્ટે ગુરુસ્ત્રાતા ગુરૌ રુષ્ટે ન કશ્ચન ।
ત્વમેવ તત્ર દૃષ્ટાન્તરૂપોઽગસ્ત્યકૃપોદિતઃ ॥ ૪.૩૯॥

ઇતિ કલિસન્તારક શ્રીગુહગીતાયાં બ્રહ્મવિદ્યાયાં
અદ્વૈતશાસ્ત્રે ભિક્ષુરૂપિગુહહિડિમ્ભસંવાદે
જ્ઞાનોત્પત્તિર્નામ ચતુર્થોઽધ્યાયઃ ॥ ૪॥

---

અથ પઞ્ચમોઽધ્યાયઃ

માયામોહજાલમ્

હિડિમ્ભ ઉવાચ-

અહો સર્વમિદં બ્રહ્મ બદ્ધો મુક્તશ્ચ કઃ પુનઃ ।
સર્વમાશ્ચર્યમેવ સ્યાત્ મન્મનઃ ક્લિશ્યતે પ્રભો ॥ ૫.૧॥

સદ્ગુરો ભગવન્ સ્વામિન્ કિમર્થં જગદીદૃશમ્ ।
ઉચ્ચાવચં ભાતિ બ્રહ્મ માયામૂલં ચ મે વદ ॥ ૫.૨॥

શ્રીભિક્ષુરુવાચ-

માયાઽવિદ્યા વિશુદ્ધા ચિત્ જીવ આત્મા ચ વાસના ।
વ્યાવહારિકસત્તાયાં ષડસ્માકં અનાદયઃ ॥ ૫.૩॥

વ્યાવહારિકસર્વસ્વં મિથ્યૈવ પરમાર્થતઃ ।
ત્રૈકાલિકાબાધ્યવસ્તુ સચ્ચિદાનન્દલક્ષણમ્ ॥ ૫.૪॥

બ્રહ્મૈકમેવ સત્યં હિ તદાત્મા પરિકીર્તિતઃ ।
સ્વસ્વરૂપાનુસન્ધાને જ્ઞાને સર્વં વિલીયતે ॥ ૫.૫॥

બદ્ધો મુક્ત ઇતિ વ્યાખ્યા ગુણતો નૈવ વસ્તુતઃ ।
ગુણસ્તુ માયામૂલત્વાત્ ન તે મોક્ષો ન બન્ધનમ્ ॥ ૫.૬॥

વક્ષ્યે શ‍ૃણુ સમાસેન સર્વસાધનમુત્તમમ્ ।
વ્યાવહારિકલોકાનાં ઉદ્ધારાર્થં હિડિમ્ભક ॥ ૫.૭॥

અપેક્ષિતાર્થઃ સર્વેષાં ભુક્તિર્મુક્તિશ્ચ સર્વદા ।
મુક્તિર્નાનાવિધા પ્રોક્તા મયા વેદાનુસારતઃ ॥ ૫.૮॥

તત્ર સાયુજ્યરૂપાયા મુક્તેઃ સાક્ષાત્તુ સાધનમ્ ।
સમ્યક્ જ્ઞાનં ન કર્મોક્તં ન તયોશ્ચ સમુચ્ચયઃ ॥ ૫.૯॥

નિત્યસિદ્ધાઽથવા મુક્તિઃ સાધ્યરૂપા દ્વયોર્ગતિઃ ।
નિત્યસિદ્ધા તુ સર્વેષાં આત્મરૂપાઽથવાઽપરા ॥ ૫.૧૦॥

આત્મરૂપૈવ ચેન્મુક્તિઃ નિત્યપ્રાપ્તા હિ સાત્મનઃ ।
નિત્યપ્રાપ્તસ્ય ચાપ્રાપ્તિઃ વિભ્રમઃ ખલુ દેહિનામ્ ॥ ૫.૧૧॥

વિભ્રમસ્ય નિવૃત્યા સા પ્રાપ્તેતિ વ્યપદિશ્યતે ।
વિભ્રમસ્ય નિવૃત્તિસ્તુ સિદ્ધ્યત્યજ્ઞાનનાશનાત્ ॥ ૫.૧૨॥

અજ્ઞાનસ્ય વિનાશસ્તુ જ્ઞાનાદેવ ન ચાન્યતઃ ।
જ્ઞાનાદજ્ઞાનનાશસ્તુ પ્રસિદ્ધસ્સર્વદેહિનામ્ ॥ ૫.૧૩॥

અપરા સા પરા મુક્તિઃ આત્મરૂપૈવ ચેન્મતમ્ ।
તથાપિ મુક્તિઃ પ્રાપ્યા વા નાપ્રાપ્યા વાઽઽત્મના ભવેત્ ॥ ૫.૧૪॥

પ્રાપ્યા ચેત્ આત્મના મુક્તિઃ અપ્રાપ્તપ્રાપ્તિરેવ સા ।
અપ્રાપ્તપ્રાપ્તિરપ્યસ્ય સમ્બન્ધો વૈક્યમેવ ચ ॥ ૫.૧૫॥

સ સમ્બન્ધશ્ચ સાધ્યો વા નિત્યો વા સાધ્ય એવ ચેત્ ।
અનિત્યસ્સ તુ સમ્બન્ધો ભવેન્નિત્યો ન સર્વદા ॥ ૫.૧૬॥

સાધ્યાનામપિ ભાવાનાં અનિત્યત્વં વ્યવસ્થિતમ્ ।
અભાવસ્ય ન સાધ્યત્વં પ્રધ્વંસાખ્યસ્ય સર્વદા ॥ ૫.૧૭॥

સાધ્યત્વાખ્યસ્તુ ધર્મશ્ચ નૈવાભાવાશ્રયો ભવેત્ ।
નિત્યો યદિ સ સમ્બન્ધઃ તર્હિ સમ્બન્ધસઞ્જ્ઞિતા ॥ ૫.૧૮॥

મુક્તિશ્ચ નિત્યસિદ્ધૈવ મુમુક્ષોરાત્મનો ભવેત્ ।
તથાપિ નિત્યપ્રાપ્તાયા મુક્તેઃ પ્રાપ્તિસ્તુ પૂર્વવત્ ॥ ૫.૧૯॥

વિજ્ઞાનેનૈવ નાન્યેન સત્યમુક્તં ચિદાત્મકમ્ ।
અપ્રાપ્તપ્રાપ્તિરૂપાય મુક્તેરૈક્યં ભવેદ્યદિ ॥ ૫.૨૦॥

તન્ન યુક્તં દ્વયોરૈક્યં ન સિદ્ધ્યતિ કદાચન ।

ભિન્નયોઃ ભેદનાશે વા મુક્તિર્ભેદે સ્થિતેઽથવા ॥ ૫.૨૧॥

ભેદનાશે તયોરૈક્યં ઘટતે નાત્ર સંશયઃ ।
ભેદે સતિ ભવેદૈક્યં ઇતિ ચેત્ તન્ન સઙ્ગતમ્ ॥ ૫.૨૨॥

ભેદસ્ય સન્નિધાનૈક્યં વિરોધાન્નૈવ સિદ્ધ્યતિ ।
ન પ્રાપ્યા હ્યાત્મના મુક્તિઃ ઇતિ ચેત્ તન્ન સઙ્ગતમ્ ॥ ૫.૨૩॥

અપ્રાપ્યાયાસ્તુ મુક્તેશ્ચ નાસ્ત્યપેક્ષા હિ સાધને ।
સાધને સતિ સા મુક્તિઃ અપ્રાપ્યૈવ સદા ખલુ ॥ ૫.૨૪॥

ન નિત્યસિદ્ધા સા મુક્તિઃ સાધ્યરૂપૈવ ચેન્મતમ્ ।
સાધ્યત્વે સત્યનિત્યત્વં પૂર્વમેવાભિભાષિતમ્ ॥ ૫.૨૫॥

પ્રધ્વંસસ્ય તુ નિત્યત્વં સર્વશો ન ભવિષ્યતિ ।
અચિદ્રૂપસ્ય સર્વસ્ય વિનાશો ગમ્યતે યતઃ ॥ ૫.૨૬॥

ભાવત્વે સતિ સાધ્યત્વાત્ વિનાશશ્ચેતનસ્ય તુ ।
પ્રધ્વંસસ્ય તુ સાધ્યત્વેઽપ્યભાવત્વેન હેતુના ॥ ૫.૨૭॥

ન સિદ્ધ્યતિ વિનાશશ્ચેત્ તચ્ચ નૈવ સુસઙ્ગતમ્ ।
પ્રાગભાવસમાખ્યસ્યાપ્યનિત્યત્વસ્ય દર્શનાત્ ॥ ૫.૨૮॥

પ્રાગભાવસ્ય સાધ્યત્વાભાવે સત્યપ્યભાવતઃ ।
અનિત્યત્વં યદિષ્યેત પ્રધ્વંસસ્યાપિ તત્સમમ્ ॥ ૫.૨૯॥

ભાવાનામપ્યભાવાનાં સાધ્યાનાં ચ હિડિમ્ભક ।
અસાધ્યાનાં ચ સર્વેષાં અનિત્યત્વે પ્રયોજકમ્ ॥ ૫.૩૦॥

અચેતનત્વમેવોક્તં નેતરદ્વ્યભિચારતઃ ।
ચેતનસ્ય તુ નિત્યત્વં શ્રુતિરાહ સનાતની ॥ ૫.૩૧॥

તસ્માદુક્તપ્રકારેણ મુક્તિઃ સાયુજ્યરૂપિણી ।
જ્ઞાનલભ્યા ક્રિયામાત્રાત્ ન લભ્યા ન સમુચ્ચયાત્ ॥ ૫.૩૨॥

જ્ઞાનં નામાખિલં ચેદં મદ્રૂપેણાવભાસનમ્ ।
ક્રિયા તુ કારણાપેક્ષા ન જ્ઞાનાલમ્બિની સદા ॥ ૫.૩૩॥

અતઃ ક્રિયાયા જ્ઞાનેન વિરોધાદેવ સર્વદા ।
સમુચ્ચયો ન યુજ્યેત કુતસ્તેન પરા ગતિઃ ॥ ૫.૩૪॥

સારૂપ્યાખ્યા તુ સા મુક્તિઃ સામીપ્યાખ્યા ચ યાઽપરા ।
સાલોક્યાખ્યા ચ યા તાસાં કેવલં કર્મ સાધનમ્ ॥ ૫.૩૫॥

ઐહિકામુષ્મિકાકારા મુક્તયઃ સર્વદેહિનામ્ ।
કર્મણૈવ હિ સિદ્ધ્યન્તિ ન જ્ઞાનેન વિરોધતઃ ॥ ૫.૩૬॥

જ્ઞાનં કર્મ ચ વેદોક્તમેવ નાન્યોદિતં ભવેત્ ।
અન્યોદિતં તુ મન્યન્તે વ્યવહારે વિવેકિનામ્ ॥ ૫.૩૭॥

અપેક્ષ્ય બુદ્ધિં વિજ્ઞાનં કર્મ ચેતિ વિધીયતે ।
તથાપિ વ્યવહારે તે વ્યાવહારિકસિદ્ધિદે ॥ ૫.૩૮॥

વેદશ્શિવઃ શિવોઽહં વૈ સર્વં બ્રહ્મમયં જગત્ ।
વેદનિન્દા ન કર્તવ્યા જ્ઞાનિના યત્રકુત્રચિત્ ॥ ૫.૩૯॥

તસ્માત્સર્વત્ર નાસ્તિક્યં ન કુર્યાન્મે મતિસત્તમઃ ।
નાસ્તિક્યાદેવ સર્વેષાં સંસારે પરિવર્તનમ્ ॥ ૫.૪૦॥

અસ્તીત્યેવોપલબ્ધવ્યઃ પરમાત્મા શ્રુતેસ્સ્વયમ્ ।
લીલામાત્રં પ્રભોર્જન્મ સંસારપરિવર્તનમ્ ॥ ૫.૪૧॥

ધર્માધર્મૌ પુણ્યપાપે પ્રાણિનાં કર્મબન્ધનમ્ ।
ભસ્મસાત્કુરુતે જ્ઞાનવહ્નિઃ સંસારવાસનામ્ ॥ ૫.૪૨॥

સર્વં ત્યક્ત્વૈવ મનસા યેન ત્યજસિ તત્ત્યજ ।
સ્વયમેવ સ્વયં સાક્ષાત્ કિં વક્તવ્યમતઃ પરમ્ ॥ ૫.૪૩॥

ઇતિ કલિસન્તારક શ્રીગુહગીતાયાં બ્રહ્મવિદ્યાયાં
અદ્વૈતશાસ્ત્રે ભિક્ષુરૂપિગુહહિડિમ્ભસંવાદે
માયામોહજાલં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

---

અથ ષષ્ઠોઽધ્યાયઃ

જીવબ્રહ્મૈક્યમ્

હિડિમ્ભ ઉવાચ-

સર્વમુક્તં સમાસેન સદ્ગુરો મય્યનુગ્રહાત્
ત્વયૈવાહં બ્રહ્મવિચ્ચ ન મે જન્મ ન મે મૃતિઃ ॥ ૬.૧॥

દેહબુદ્ધ્યા ભવદ્દાસઃ જીવબુદ્ધ્યા ત્વદંશકઃ ।

આત્મબુદ્ધ્યા ત્વમેવાહં સદ્ગતોઽસ્મિન્ ન સંશયઃ ॥ ૬.૨॥

અથ કેન પ્રયુક્તોઽહં કુર્વે કર્મ જગદ્ગુરો ।
જીવન્મુક્તઃ સુખી તૂષ્ણીં સ્થાસ્યામીત્યબ્રુવં મુને ॥ ૬.૩॥

શ્રીભિક્ષુરુવાચ-
સમ્યગ્વ્યવસિતા બુદ્ધિઃ હિડિમ્ભ તવ તાત્ત્વિકે ।
અપિ ચેદ્દેહયાત્રાયાં અવશસ્ત્વં હિ માયયા ॥ ૬.૪॥

આધિકારિકજીવોઽસિ મલ્લોકે પાર્ષદોઽસિ ચ ।
આકલ્પાન્તં મયાઽજ્ઞપ્તઃ કર્મ કર્તું ત્વમર્હસિ ॥ ૬.૫॥

બ્રહ્મણા સહ મુક્તિઃ સ્યાત્ પ્રલયે તવ ચાનઘ ।
કર્મતત્ત્વં પ્રવક્ષ્યામિ શ઼ૃણુ ગુહ્યં સનાતનમ્ ॥ ૬.૬॥

નિયતં કુરુ કર્મ ત્વં કર્મ જ્યાયો હ્યકર્મણઃ ।
શરીરયાત્રાપિ ચ તે ન પ્રસિદ્ધ્યેદકર્મણઃ ॥ ૬.૭॥

નહિ કશ્ચિત્ ક્ષણમપિ જાતુ તિષ્ઠત્યકર્મકૃત્ ।
કાર્યતે હ્યવશઃ કર્મ સર્વઃ પ્રકૃતિજૈર્ગુણૈઃ ॥ ૬.૮॥

કર્મ બ્રહ્મોદ્ભવં વિદ્ધિ બ્રહ્માક્ષરસમુદ્ભવમ્ ।
તસ્માત્સર્વગતં બ્રહ્મ નિત્યં યજ્ઞે પ્રતિષ્ઠિતમ્ ॥ ૬.૯॥

સહયજ્ઞાઃ પ્રજાઃ સૃષ્ટ્વા પુરોવાચ પ્રજાપતિઃ ।
અનેન પ્રસવિષ્યધ્વં એષ વોઽસ્ત્વિષ્ટકામધુક્ ॥ ૬.૧૦॥

દેવાન્ ભાવયતાનેન તે દેવા ભાવયન્તુ વઃ ।
પરસ્પરં ભાવયન્તઃ શ્રેયઃ પરં અવાપ્સ્યથ ॥ ૬.૧૧॥

ઇષ્ટાન્ ભોગાન્ હિ વો દેવાઃ દાસ્યન્તે યજ્ઞભાવિતાઃ ।
તૈર્દત્તાનપ્રદાયૈભ્યો યો ભુઙ્ક્તે સ્તેન એવ સઃ ॥ ૬.૧૨॥

યજ્ઞશિષ્ટાશિનઃ સન્તો મુચ્યન્તે સર્વકિલ્બિષૈઃ ।
ભુઞ્જન્તે તે ત્વઘં પાપા યે પચન્ત્યાત્મકારણાત્ ॥ ૬.૧૩॥

અન્નાદ્ભવન્તિ ભૂતાનિ પર્જન્યાદન્નસમ્ભવઃ ।
યજ્ઞાદ્ભવતિ પર્જન્યો યજ્ઞઃ કર્મસમુદ્ભવઃ ॥ ૬.૧૪॥

યજ્ઞાદ્ભવન્તિ ભૂતાનિ પર્જન્યાદન્નસમ્ભવઃ ।
યજ્ઞાદ્ભવતિ પર્જન્યો યજ્ઞઃ કર્મસમુદ્ભવઃ ॥ ૬.૧૪॥ repeat

યજ્ઞાર્થાત્ કર્મણોઽન્યત્ર લોકોઽયં કર્મબન્ધનઃ ।
તદર્થં કર્મ શૈરેય મુક્તસઙ્ગઃ સમાચર ॥ ૬.૧૫॥

એવં પ્રવર્તિતં ચક્રં નાનુવર્તયતીહ યઃ ।
અઘાયુરિન્દ્રિયારામો વ્યર્થજીવી સ એવ હિ ॥ ૬.૧૬॥

આત્માનં રથિનં વિદ્ધિ શરીરં રથમેવ તુ ।
બુદ્ધિં તુ સારથિં વિદ્ધિ મનઃ પ્રગ્રહમેવ ચ ॥ ૬.૧૭॥

ઇન્દ્રિયાણિ હયાનાહુઃ વિષયાંસ્તેષુ ગોચરાન્ ।
આત્મેન્દ્રિયમનોયુક્તં ભોક્તેત્યાહુઃ મનીષિણઃ ॥ ૬.૧૮॥

યસ્ત્વવિજ્ઞાનવાન્ ભવતિ અયુક્તેન મનસા સદા ।
તસ્યેન્દ્રિયાણિ વશ્યાનિ દુષ્ટાશ્વા ઇવ સારથેઃ ॥ ૬.૧૯॥

યસ્તુ વિજ્ઞાનવાન્ ભવતિ યુક્તેન મનસા સદા ।
તસ્યેન્દ્રિયાણિ વશ્યાનિ સદશ્વા ઇવ સારથેઃ ॥ ૬.૨૦॥

યસ્ત્વવિજ્ઞાનવાન્ ભવત્યમનસ્કઃ સદાઽશુચિઃ ।
ન સ તત્પદમાપ્નોતિ સંસારં ચાધિગચ્છતિ ॥ ૬.૨૧॥

યસ્તુ વિજ્ઞાનવાન્ ભવતિ સમનસ્કઃ સદા શુચિઃ ।
સ તુ તત્પદમાપ્નોતિ યસ્માદ્ભૂયો ન જાયતે ॥ ૬.૨૨॥

વિજ્ઞાનસારથિર્યસ્તુ મનઃપ્રગ્રહવાન્નરઃ ।
સોઽધ્વનઃ પારમાપ્નોતિ મત્પદં પરમં શિવમ્ ॥ ૬.૨૩॥

ઇન્દ્રિયેભ્યઃ પરા હ્યર્થા અર્થેભ્યશ્ચ પરં મનઃ ।
મનસશ્ચ પરા બુદ્ધિઃ બુદ્ધેરાત્મા મહાન્ પરઃ ॥ ૬.૨૪॥

મહતઃ પરમવ્યક્તં અવ્યક્તાત્ પુરુષઃ પરઃ ।
પુરુષાન્ન પરં કિઞ્ચિત્ સા કાષ્ઠા સા પરા ગતિઃ ॥ ૬.૨૫॥

એષ સર્વેષુ ભૂતેષુ ગૂઢઃ આત્મા ન પ્રકાશતે ।
દૃશ્યતે ત્વગ્ર્યા બુદ્ધ્યા સૂક્ષ્મયા સૂક્ષ્મદર્શિભિઃ ॥ ૬.૨૬॥

યચ્છેદ્વાઙ્મનસી પ્રાજ્ઞઃ તદ્યચ્છેત્ જ્ઞાન આત્મની ।
જ્ઞાનમાત્મનિ મહતિ તદ્યચ્છેત્ શાન્ત આત્મનિ ॥ ૬.૨૭॥

મયિ સર્વાણિ કર્માણિ સન્ન્યસ્યાધ્યાત્મચેતસા ।
અસક્તો હ્યાચરન્ કર્મ પરમાપ્નોતિ નાન્યથા ।

કિં ભવાનિચ્છતિ પુનર્નિસ્સન્દેહો ભવાર્ભક ॥ ૬.૨૮॥

હિડિમ્ભ ઉવાચ-
પરમાત્મન્ ગુરો ભિક્ષો ત્વમેવાહં ગતિર્મમ ।
દ્રષ્ટુમિચ્છામિ તે ભૂયો રૂપં ષાણ્મુખમૈશ્વરમ્ ॥ ૬.૨૯॥

ભવદાજ્ઞાવશઃ કુર્વે ત્વદિષ્ટં કર્મ નાન્યથા ।
ત્વત્ષણ્મુખત્વસ્વરૂપં બ્રહ્મ પિણ્ડાણ્ડયોઃ કથમ્ ॥ ૬.૩૦॥

શ્રીભિક્ષુરુવાચ-
જ્ઞાનેન્દ્રિયમનોબુદ્ધિઃ મહદવ્યક્તપૂરુષઃ ।
પિણ્ડાણ્ડે ષણ્મુખાનીતિ મદીયાનિ વિભાવય ॥ ૬.૩૧॥

તદશક્તૌ તુ સર્વત્ર જ્ઞાનેન્દ્રિયમનાંસિ ચ ।
દૃશ્યં જગચ્ચ બ્રહ્માણં વિષ્ણું રુદ્રં તથેશ્વરમ્ ॥ ૬.૩૨॥

સદાશિવં શિવશતં બ્રહ્માણ્ડે પરિભાવય ।
પશ્ય મે તાદૃશં રૂપં મલ્લોકે સ્કન્દનામકે ।
મામેવ શરણં ગચ્છ મય્યર્પિતમના ભવ ॥ ૬.૩૩॥

હિડિમ્ભ ઉવાચ-
ઇત્યુક્ત્વા ષાણ્મુખૈશ્વર્યરૂપં ધૃત્વાઽથ ભિક્ષુકઃ ।
સ્કન્દલોકં જગામાથ સુબ્રહ્મણ્યઃ શિખીન્દ્રગઃ ॥ ૬.૩૪॥

ષાણ્મુખૈશ્વર્યં તાદ્રૂપ્યં તદાનીન્તનવૈભવમ્ ।
સર્વલોકેષુ સર્વેષુ દૃષ્ટ્વા મયિ ચ વિસ્મિતઃ ॥ ૬.૩૫॥

જડદેહી કિયત્કાલં નીતોઽહં મામપિ સ્વયમ્ ।
ન જાનેઽથ સ્વયં મન્દમ્ પ્રબુદ્ધો વ્યાવહારિકે ॥ ૬.૩૬॥

જગતીત્થં ચરિષ્યામિ સ્વામિપ્રેરણયા યથા ।
ગુહગીતામિમાં શ્રુત્વા ધન્યો ભવતિ માનવઃ ॥ ૬.૩૭॥

અર્થાનુસન્ધાનપરો મુક્ત એવ ન સંશયઃ ।
ઇયં ચોક્તા તવ મુને ગુહ્યાદ્ગુહ્યતરં ખલુ ।
ન ચાશુશ્રૂષવે વાચ્યા નાભક્તાય કદાચન ॥ ૬.૩૮॥

ઇતિ કલિસન્તારક શ્રીગુહગીતાયાં બ્રહ્મવિદ્યાયાં
અદ્વૈતશાસ્ત્રે ભિક્ષુરૂપિગુહહિડિમ્ભસંવાદે

જીવબ્રહ્મૈક્યં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૬॥

ૐ તત્સત્ બ્રહ્માર્પણમસ્તુ ॥

Proofread by Sunder Hattangadi
PSA Easwaran

*Guhagita*
pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*